सह युगपत् दुरूपापानि आप्नुमशक्यानि सर्वेषां महाव्रतयज्ञानुष्ठाने प्रयोगबाहुल्येन ऋत्विक्सम्पादनादेः दुष्करत्वेन चानधिकारात् तत्राग्निष्टोम इति पदेनाग्निस्तवनोक्तेरग्निचयनमुक्तमिति मन्तव्यम् । पक्ष्याकारस्य महाव्रतसाम्नो हि शिरःपक्षमध्यपुच्छात्मकाः पञ्चावयवाः शिरो गायत्रं, रथन्तरं दक्षिणः पक्षः बृहदुत्तरः पक्षः भद्रमस्य पुच्छं राजनसाम ह्यात्मेति तत्सर्वमग्निष्टोमे सम्पादयति तस्य वा इति ऋक्त्रयात्मकमेकं सूक्तं तादृशानि त्रीणि सूक्तानि त्रिवृतोऽवयवायस्य स्तोमस्य तदिदं त्रिवृद्वहिष्पवमानम् प्रातःसवनिकं तृचं सूक्तत्रयात्मकं वहिष्पवमानं महाव्रतस्य शिरो भवति बहिष्पवमानमपि गायत्रीच्छन्दस्कैस्तृचैर्गातव्यम् माध्यन्दिनः पञ्चदशस्तोत्रियात्मकः पवमानः, तृतीयसवने सप्तदशस्तोत्रियात्मकः आर्भवः पवमानः पक्षस्थानीयौ होत्रानुशंसनीयं प्रथममाज्यस्तोत्रं सप्तदशस्तोत्रियात्मकं पृष्ठनामकं होतुः प्रथमं स्तोत्रम् तदुभयं मध्यात्मरूपम् । एकविंशत्यावृत्तिरूपं “यज्ञायज्ञा वो अग्नयः” इत्यत्रोत्पन्नं साम पुच्छस्थानीयम्” भा० २सोमयागे च ‘‘ज्योतिष्टोमधर्मा एकाहद्वादशाहयोस्तद्गुणदर्शनात्” कात्या० श्रौ० १२।१।१ ‘‘ज्योतिष्टोमशब्देन उपांश्वादिहारियोजनपर्यन्तो ग्रहयज्ञाभ्यासोऽभिधीयते ज्योतींषि यस्य स्तोमाः स ज्योतिष्टोमः स्तोमैर्ह्यसौ द्योत्यत इति ते च सोमयागस्य स्तोमाः तस्मात् ज्योतिष्टोमशब्देन सोमयागोऽभिधीयते” कर्कः ।

ज्योतिष्मत् त्रि० ज्योतिरस्त्यत्र मतुप् । १ज्योतिर्युक्ते २प्रकाशयुक्ते ३लताभेदे स्त्री । सा च (मालकाङ्गनी) इति ख्याता लता ।“ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् । अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा” राजनि० ४रात्रौ राजनि०। ५योगशास्त्रोक्ते सत्त्वप्रधाने चित्तवृत्तिभेदे च ।“विशोका वा ज्योतिष्मती”पात०सू०। “प्रवृत्तिरुत्पन्ना चित्तस्य स्थिति-निबन्धिनीति वाक्यशेषः। ज्योतिःशब्देन सात्त्विकः परिणाम उच्यते स प्रशस्तो भूयानतिशयश्च विद्यते यस्याम्” भोजवृत्तिः “प्रसीदतु ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः”महावी० “ज्योतिष्मतः पथो रक्ष धिया कृतान्” ऋ० १०।५३।६ “ज्योतिष्मतो दीप्तिमतः” भा० ६अग्निपुर्य्याम् अर्चिष्मत्यां तत्कथा अग्निलोकशब्दे ५८ पृ० दृश्यम् । यो-ऽयमस्य यथाऽनेन प्रापि ज्योतिष्मती पुरी” काशी० ।

७सूर्ये ८प्लक्षद्वीपस्थे ९पर्वतभेदे च शब्दार्थचिन्तामणिः ।

ज्योतिस् पु०द्योतते द्युत्यतेऽनेन वा द्युत–इसुन् आदेर्दस्य जः ज्युत–दीप्तौ वा इसुन् । १सूर्ये २अग्नौ, मेदि० ३मेथिकावृक्षे राजनि० च । नेत्रकनीनिकामध्यस्थे ४दर्शनसाधने, पदार्थे, शब्दार्थचि० ५नक्षत्रे, ६प्रकाशे, शब्दच० ७स्वयंप्रकाशे, सर्वावभासके चैतन्ये च न० । ८अग्निष्टोमयागस्य संस्थाभेदे यथोक्तं ताण्ड्य०ब्रा०४।१।७ “स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरितीमे वै लोका एते स्तोमा अयमेव ज्योतिरयं मध्यमो गौरसावुत्तम आयुः” मू० ।

“स पूर्वोक्तः प्रजापतिः एतान् स्तोमान् स्तोमशब्देन त्रिवृदादिस्तोमवन्त्यहानि लक्ष्यन्ते । तानि ज्योतिर्गौरायुरिति एतन्नामकान्यपश्यत् । तत्र ज्योतिरग्निष्टोमसंस्थः गौरायुषी उक्थसंस्थे ज्योतिष इयं स्तोमक्लृप्तिः । त्रिवृद्वहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशोऽग्नीष्टोमसामेति । अथ गोष्टोमस्य पञ्चदशो बहिष्पवमानः त्रिवृदाज्यानि सप्तदशं माध्यन्दिनं सवनमेकविंशं तृतीयसवनम् । अथायुष्टोमस्य त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशं माध्यन्दिनं सवनमेकविंशं तृतीयसवनमिति । एते उक्ताः स्तोमा इमे लोका वै भूरादिकाः खलु कः कतमो लोक इति बुभुत्सायामाह अयमेव लोको ज्योतिः । अयम्मध्यमः अन्तरीक्षलोको गौः असावुत्तमस्तृतीयः स्वर्लोक आयुः । स्तोमत्रयस्य लोकत्रयेण सह संख्यासाम्यात् तच्छब्दता एतैः त्रिभिः स्तोमैः साधनैस्त्रीन् लोकान् प्राजनयदिति शेषः” भा० । ९विष्णौ “विहायसगतिर्ज्योतिः सर्वविद्भूतभुग् विभुः” विष्णुस० स्वयंद्योतनात् तस्य तथात्वम ।“अथ यदतः परो दिवो ज्योतिर्दीप्यते । विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु । इदं वाव तद्यदिदमन्तःपुरुषे ज्योतिः” छा० उ० । एतामधिकृत्य “ज्योतिःशब्दस्य परब्रह्मपरत्वं शा०सू० भा० व्यवस्थापितं यथा ‘ज्योतिश्चरणाभिधानात्”१।१।२४सूत्रभाष्यादौ दृश्यम् ।“चक्षुर्वृत्तेर्निरोधकं शार्वरादिकं तमः। तस्या एवानुग्राहकमादित्यादिकं ज्योतिरिति” शा० भा० । १०तेजोद्रव्यमात्रे तस्य प्रकाशवत्त्वात्तथात्वं तदपि तत्रैव भाष्ये दृश्यम् । “ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते”। “ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्। योऽन्तःसुखो-